जयः

न हि सङ्क्रान्त्यहस्स्वस्मद्भूमिः पश्चात्करिष्यते।
यतो वरीतुमीशैव तां श्रीभगवतीमियम्॥ - इटश्शेरि

जयं वदति धर्मज्ञः कविः कल्पान्तलोचनः।
नरं नारायणं चैव यः साक्षादकरोत् स्वयम्॥ १॥

युगसङ्क्रमसन्ध्यायां कुरुक्षेत्रमिदं पुनः।
इह प्रकाशा रक्तार्द्राः शासकास्तिमिरोत्कराः॥ २ ॥

रुधिरं लेढि वेताळो भुवमावृत्य जिह्वया।
उदयाभेति वन्दन्ते त्रिसन्ध्यां शकुनिव्रजाः॥ ३ ॥

यूपे बध्वासिमुद्धृत्य मन्त्रं जपति यत्तदा।
प्रकम्पिता यागपशुर्धरा भवति मूर्च्छिता॥ ४ ॥

निर्गळद्रक्तदुर्गन्धकबन्धोग्ररणाङ्कणे।
स्मृतिगीतां जपत्युच्चैः कर्मचन्द्रस्य काहळः॥ ५ ॥

तस्य शङ्खे यादवस्य जगत्प्राणाः स्फुरन्त्यथ।
तद्योगचक्रसूत्रेस्मिन्निन्द्रप्रस्थोऽवबध्यते॥ ६ ॥

कुरुपाण्डवयोः शक्तितारतम्यपरीक्षणे।
विशीर्यमाणाजिरथनिपतत्केतनोपरि॥ ७ ॥

अग्निज्वालालिह्यमानसहस्रशिबिरोपरि।
प्रक्षुब्धनिखिलक्षोणीचक्रवात्याशतोपरि॥ ८ ॥

प्रळयानलवद्व्याप्तचक्रवाळोज्ज्वलप्रभे!।
जयप्रकाशविमलरश्मिजे धार्मिकप्रभे!॥ ९॥

कृतज्ञताप्रकर्षार्द्रहृदया निखिले वयम्।
भवत्यैव सनाथा ये पञ्चाशत्कोटयो जनाः॥ १० ॥

उन्मीलदन्तर्नेत्रोऽहं पश्याम्यासन्नभूतजम्।
त्वदाज्ञाचारितामेतां पुण्यगङ्गातटावलिम्॥ ११ ॥

नेति नेतीत्यनन्ताभमेतदुत्तरभारतम्।
इच्छां ज्वालावदूर्ध्वोर्ध्वं ज्वलन्तीं तावकीं तताम्॥ १२ ॥

उग्रां तपस्यामगतीनुद्धर्तुं वीर्यचोदितान्।
सत्यायनं येन पथा चरतैकर्षिणा त्वया॥ १३ ॥

[1]Orginal poem in Malayalam by Vishnunarayanan Namboodiri. Translated into Sanskrit by N.V.P.Unithiri, Prof. of Sanskrit (Retd.), University of Calicut, Kerala.

कालपूरुष! शोकेभ्यो जिह्वा दत्तास्त्वया तदा।
गद्गदोद्भिन्नकण्ठानां प्राणधारास्तथैव च॥ १४ ॥

अविरामं द्रवत्युच्चैर्भवदेतत्पदाहतेः।
खुरक्षेपाक्षमास्वस्थधीरयौवनसाहसम्॥ १५ ॥

सत्यस्याङ्कुरितस्यास्य तटेष्वाहो प्रपुष्यति
किंशुकाळीवाद्ययावत् संवृतं त्वस्थिपञ्जरम्॥ १६ ॥

आ भूमिगहनं तस्मिन्ननुक्षणविकस्वरे।
स्थिते प्रकम्पते दण्डः, क्षिप्तानि मुकुटान्यहो!॥ १७॥

अभयोन्निद्रशक्त्युत्थचण्डवातस्वरूपिणि!।
असत्यशासनोन्मूलच्छेदकृच्चोद्यरूपिणि!॥ १८ ॥

प्रळयानलवद्व्याप्तचक्रवाळोज्ज्वलप्रभे!।
इन्त्याहृदयनिष्यन्दिजीवरक्तसमुज्ज्वले!॥ १९ ॥

कृतज्ञताभरोन्निद्रपुळका निखिले वयम्।
भवत्यैव सनाथा ये पञ्चाशत्कोटयो जनाः॥ २० ॥

इन्त्येति नाम भावाढ्ये! शिलाजाड्यप्रभेदिनि!।
अन्तःकरणपुष्पेण भवतीमर्चयाम्यहम्॥ २१ ॥

अपथाचाररहिता वागेवास्तु भवत्स्तुतिः।
अकृत्यद्वेषिणी कर्मपङ्क्तिः सेवापदेऽस्तु ते॥ २२ ॥

गङ्गोत्तरीतः सम्भूतां लीलां सञ्जीवनीमिमाम्।
श्रीकन्याकोटितीर्थेषु धारामेतां तरङ्गिताम्॥ २३ ॥

सहस्रशीर्षं तिष्ठन्तमत्र मर्त्यं सुबिम्बितम्।
सकृदप्यद्भुतावेशादरं पश्य वसुन्धरे!॥ २४ ॥

सकृदप्यथ पौरस्त्यगोपुरेषूत्तरोत्तरम्।
वैजयन्तीं वहत्वेषा भारतीजनसंस्कृतिः॥ २५ ॥

उज्जीवतु मृदां तेजो! मन्त्रयन्तां मरुद्गणाः!।
कर्मणः साम्यवेदान्तं कालातीतं महाबलम्॥ २६ ॥

सञ्जातं प्रथमं यस्या भुवोऽवन्ध्यगुहोदरे।
निर्मले बीजरूपेण सर्वतोभद्रवैखरी॥ २७ ॥

कदाचित् संवृतत्वेन पुनर्द्विगुणवीर्यतः।
व्यक्तीभवत्तदुग्राग्निविद्याविस्फोटलास्यके!॥ २८ ॥

प्रळयानलवद्व्याप्तचक्रवाळोज्ज्वलप्रभे! ।
आदित्यप्राणभूतेऽस्मदनाद्यन्तप्रभावके! ॥ २९ ॥

कृतज्ञताभरोद्दीप्तविनया निखिले वयम् ।
भवत्यैव सनाथा ये पञ्चाशत्कोटयो जनाः ॥ ३० ॥

जय इति व्यासेन दत्तं महाभारतस्य नाम। धर्मस्य जय इत्यर्थः।

मूलकवितारचनातिथिः - 24. 5. 1977.